# टिळक महाराष्ट्र विद्यापीठ, पुणे

**19R**

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जानेवारी – २०२३**

**सत्र ४ थे**

**विषयः ऐतिहासिक काव्ये** (19R446)

दिनांक :१८/०१/२०२३ गुण : ६० वेळ : स. १०.०० ते दु. १२.३०

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १. योग्य पर्यायं चिनुत।** **(०६)**

१) पिष्टं .......... येन। (नागपूरम्, पिष्टपुरम्, कोटपुरम्, वातापिपुरम्)

२) त्रिंशत्सु .......... भारतादाहवादितः। ( द्विसहस्रेषु, चतुस्सहस्रेषु, त्रिसहस्रेषु, एकसहस्रेषु)

३) शुचां विषयः .......... । (स्त्रियः, राजा, सैनिकाः, परिचारकाः)

४) .......... राज्यश्रियः परिचारकः। (गौडनरेशः, संवादकः, स्कन्दगुप्तः कुन्तलः)

५) राज्यवर्धनस्य प्रसादभूमिः ..........। (गौडनरेशः, संवादकः, स्कन्दगुप्तः कुन्तलः)

३) .......... गतभूयिष्ठे वयसि वर्तमानः। (संवादकः, कुन्तलः, सिंहनादः, शशाङ्कः)

**प्र. २. अ) टिप्पणीद्वयं लिखत–** अशौचदिवसाः, शत्रुराज्ये उपलिङ्गानि, राज्यवर्धनस्य परिचारकाः । **(१२)**

**प्र. २. आ) टिप्पणीमेकां लिखत–** ऐहोळेप्रशस्तेः महत्त्वम्, मङ्गलेशस्य पराक्रमः। **(०६)**

**प्र. ३. अ) ससन्दर्भ वाक्यद्वयं स्पष्टीकुरुत।** **(१२)**

१. औरसदर्शनं हि यौवनं शोकस्य। २. स्कन्दगुप्तो विवेश राजकुलम्। ३. श्रूयतां मे प्रतिज्ञा।

**प्र. ३. आ) ससन्दर्भ वाक्यमेकं स्पष्टीकुरुत।** **(०६)**

१. पृथुकदम्बकदम्बकदम्बकम्। २. निर्मापितं मतिमता रविकीर्तिनेदम्।

**प्र. ४. अ) एकं परिच्छेदं माध्यमभाषया अनुवदत।** **(१२)**

१. अरणिरमर्षाग्नेः, ऐश्वर्य शौर्यस्य, मदो मदस्य, विसर्पो दर्पस्य, हृदयं हठस्य, जीवितं जिगीषुतायाः, समुच्छ्वसितमुत्साहस्य, अङ्कुशो दुर्मदानां, नागदमनो दुष्टभोगिनां, विरामो वरमनुष्यतायाः, कुलुगुरुर्वीरगोष्ठीनां, तुला शौर्यशालिनां, सीमान्तदृश्वा शस्त्रग्रामस्य, निर्वोढा प्रौढवादानां, संस्तम्भयिता भग्नानां, पारगः प्रतिज्ञाया, मर्मज्ञो महाविग्रहणाम्, आघोषणापटहः समरार्थिनां, सन्निधावेव समुपविष्टः सिंहनादनामा स्वरेणैव दुन्दुभिघोषगम्भीरेण सुभटानां समररसमानयन्विज्ञापितवान्।

२. न सुमेरुवप्रप्रणयप्रगल्भा वा दिक्करिणः परिणमन्त्यणीयसि वल्मीके। ग्रहीष्यसि सकलपृथ्वीपतिप्रलयोत्पातमहाधूमकेतुं मान्धाता इव चरुचामीकरपङ्क-पत्रलतालङ्काराङ्ककायं कार्मुकं ककुभां विजये। मम तु दुर्निवारायामस्यां विपक्षक्षपणक्षुधि क्षुभितायां क्षम्यतामयमेकाकिनः कोपकवल एकः। तिष्ठतु भवान्। इत्यभिधाय च तस्मिन्नेव वासरे निर्जगामाभ्यमित्रम्।

**प्र. ४. आ) एकं श्लोकं माध्यमभाषया अनुवदत–** **(०६)**

१. लब्ध्वा कालं भुवमुपगते जेतुमाप्पायिकाख्ये गोविन्दे च द्विरदनिकरैरुत्तरां भीमरथ्याः।
यस्यानीकैर्युधि भयरसज्ञात्वमेः प्रयातस् तत्रावाप्तं फलमुपकृतस्यापरेणापि सद्यः।।

२. उत्साहप्रभुमन्त्रशक्तिसहिते यस्मिन्समस्ता दिशो जित्वा भूमिपतीन्विसृज्य महितानाराध्य देवद्विजान्।
वातापीं नगरीं प्रविश्य नगरीमेकामिवोर्वीमिमां चञ्चन्नीरधिनीलनीरपरिखां सत्याश्रये शासति।।

----------